क्र. ३२.

तर्पणनिर्णय

संस्कृत.

पृ. ८

पूर्ण.

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1) श्रीगणेशायनमः॥अथतर्पणनिर्णयः॥तत्रतर्पणंद्विविधं॥नित्यंनैमित्ति
कंचेति।तत्रवर्गद्वयोद्देशेनकारुण्योद्देशेनचवस्त्ररुद्रादिस्वरूपरहिततया
जलमात्रेणअहरहःकर्तव्यतयाविहितंतन्नित्यतर्पणं॥तथाचयाज्ञवल्क्यः॥
सवर्गेभ्योजलंदेयंअसवर्गेभ्यएवच॥नामगोत्रस्वधाकारैःप्रत्यहंतर्पयेत्
सुधीः॥तथा॥पार्वणेनयुतंश्राद्धंरूपमुद्दिश्यतर्पयेत्॥अन्यथातर्पयेत्
द्विद्वान्नामगोत्रादिसंयुतः॥खिलसंहितायामपि॥तर्पयेत्तासत्वेना
द्देशेनतत्स्वेवतुमातरं॥सापत्नमातरंपश्चात्पितामह्याक्रमादिकान्॥क्र
मादितिआदिशब्दात्मातामह्यादीनामपि॥संग्रहः॥आदौपितात
थामातासापत्नजननीतथा॥मातामहाःसपत्नीकात्मपत्न्यस्तदनंतरं॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

१ सुतभ्रातृपितृव्याश्च मातुलाः सह भार्यकाः॥ दुहिता भगिनी चैव दौहित्रो
(२१) भागिनेयकः॥ पितृष्वसा मातृष्वसा श्वशुरो गुरुरर्थिनः॥ इत्येते पितृतीर्थेन
तर्पयेयुर्यथान्वहमिति॥ एकैकमंजली देवानां द्वौ द्वौ च ऋषयस्तथा॥ अर्हंति
[स्त्री] पितरस्त्रीं न् स्त्रिय एकैकमंजलिं॥ मातृमुख्यास्तथा स्तिस्रस्तासा
मथंजलित्रयं॥ दद्यादेकैक अन्यासां स्त्रीणां चैकांजलिं बुध इति॥
नारायणीयेपि॥ एकैकं योषितां दद्यात् स्त्रीस्त्री न्पुंसो हि चांजलीन्॥
द्वौ द्वौ सापत्नमातुश्च त्री स्त्री न्मातृगणस्य तु॥ पितृणां चैव देवानां
जले दद्याज्जलांजलिं॥ असंस्कृतप्रमीतानां स्थले दद्याज्जलांजलिं॥
न मो यस्तर्पयं कुर्याल्लोहे कांस्ये च मृन्मये॥ तर्जन्यंगुष्ठयोगे च स भवेत्सि
त्रघातकः॥ स्थले वापि शुचौ देशे [illegible] कुशास्तीर्णे थ भाजने॥ ताम्रपा १

(2A)

त्रेच पर्णेवा तर्पयेत्सतिलैः शुभैः ॥ पार्थिवेनैकगुणंप्रोक्तं दर्भैः शतगुणंतथा ॥
अक्षय्यं खड्गपात्रेण [illegible] पितृणां तर्पणं भवेत् ॥ तर्पणे चैव न तीर्थे
न गृह्णीयात्तेन वै जलं ॥ अन्यथा कुरुते यस्तु नरकं प्रतिपद्यते इति ॥ नैमित्ति
के तु ॥ प्रत्याब्दिकादिश्राद्धेषु यावंत उद्दिष्टास्तावन्मात्रोद्देशेन वसुरुद्रादित्यरू
पतया तिलमिश्रोदकं कालविशेषस्पृक् कर्तव्यं [illegible] तया विहितं श्राद्धांगतिल
तर्पणं ॥ तथा च संग्रहः ॥ दर्शे तिलोदकं पूर्वं पश्चाच्छ्राद्धं महालये ॥ आब्दिके
न परं पूर्वं परेऽह्नि तिलोदकं ॥ नचैतन्नित्यतर्पणस्यैव तत्कालसंबंधि बा
धकं ॥ तर्पणांतरे बाधकमिति वाच्यं ॥ तथा सति ॥ प्रत्याब्दिकादावपि सर्वे
षां प्रसज्येत ॥ किंतु वचनांतरैस्तत्कालविशेषसंबंधितया विहितस्य तत्तच्छ्राद्धां
गतिलतर्पणस्यैवेदं वचनं तथा च ॥ दर्शे पाते च संक्रांतौ युगमन्वंतरादिषु ॥

२॥

तर्पयित्वापितॄन्पश्चाच्छ्राद्धंकुर्यात्प्रयत्नतइतिवचनेनदर्शादिपूर्वकालसंबंधितयां
(३) गतिलतर्पणंविहितं॥पक्षश्राद्धेहिरण्येचपश्चाद्दद्यात्तिलोदकं॥तथैवचाष्ट
काश्राद्धेश्राद्धेचैवानुमासिके॥वचनेनपक्षश्राद्धादिषुश्राद्धानंतरकालसंबं
धितेनां॰गतिलंतर्पणंविहितं॥ननु॥सपिंडीकरणश्राद्धेप्रेतश्राद्धानुमा
सिके॥संवत्सरविमोकेचनकुर्यात्तिलतर्पणमिति॥अनुमासिकेतिलतर्पण
स्यनिषिद्धत्वात्तत्कथं॥श्राद्धानंतरकालेकर्तव्यो॥क्ते॥इतिचेन्न॥नैवं॥इदं
वचनंपरेद्युनितिलतर्पणस्यनिषेध्यमिति॥तिलैर्वर्ज्यमात्रं॥तथाचस्मृ
तिः॥वृद्धिश्राद्धेसपिंडेचप्रेतश्राद्धानुमासिके॥परेद्युर्निविमोकेचनकुर्या
त्तिलतर्पणं॥कृत्वानुमासिकश्राद्धंसपिंडीकरणात्परं॥वैश्वदेवंततःपश्चा
त्तर्पणंतिलसंयुतं॥श्राद्धानंतरंकालएवतिलतर्पणंविहितं॥तथा॥ती २

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(3A)

र्थश्राद्धे गयाश्राद्धे श्राद्धे प्रत्याब्दिकेपि च ॥ परेहनि द्विजः कुर्यात्तर्पणं तिलसंयुत
मिति ॥ पक्षश्राद्धे तु निर्दिष्टं स्यात्तर्पणं तदनंतरं ॥ सकृन्महालये श्राद्धे परेहनि तिलोद
कमित्यादिना प्रत्याब्दिकश्राद्धेषु परेद्युः प्रातःकालविशिष्टतयाश्राद्धांगतिलतर्पणं
विहितमपि ॥ एवं तत्कालविशेषे तया विहितं ॥ ततः श्राद्धांगतर्पणं नित्यतर्पणाद्भि तर्
न्नमेवेति तर्पणद्वैविध्यमुक्तं × कर्त्तव्य × एवं द्विविधमपि तर्पणं प्रत्याब्दिकादिश्रा
द्धदिवसेषु समुच्चित्य कर्त्तव्यं तथापि ॥ तत्र नित्यतर्पणस्य सूर्योदयमारभ्य सायं
कालो भवतीति ॥ तथापि ॥ पित्रोः प्रत्याब्दिके श्राद्धे नित्यतर्पणं श्राद्धानंतरमे
व कर्त्तव्यं ॥ हारितः ॥ पित्रोः प्रत्याब्दिके श्राद्धे तर्पणं तु कथं भवेत् ॥ जलेनैव
तु कुर्वीत निवृत्ते पितृकर्मणि ॥ पितृव्यादिकारुण्यश्राद्धे तु तद्दैव नित्य
तर्पणं श्राद्धात्पूर्वं कर्त्तव्यं ॥ तथा च कारिकाकारः ॥ नित्यकर्माह्निकश्राद्धे का

Mandal, Dhule and the Y

३ रूप्यानांकुशंभवेत् ॥ आह्निकात्तर्पणंपूर्वंकुर्याछ्राद्धमनंतरं ॥ शौनकीयः ॥ पितृ
वर्गेमातृवर्गेमातामहस्यच ॥ तर्पयित्वाथकारूण्यानचैायहाथतर्पयेत् ॥ दर्शश्रा
(h) द्धेप्यपिनित्यतर्पणंश्राद्धानंतरमेवकर्तव्यं ॥ श्राद्धं कृत्वातुविधिवद्वैश्वदेवंततः
परं ॥ ब्रह्मयज्ञंततःकुर्यात्तर्पणंतुतिलैर्विनेति ॥ श्राद्धांगतर्पणमापश्राद्धा
हेतत्कालविशेषेषुकर्तव्यं ॥ तथाहि ॥ पित्रोःप्रत्याब्दिककालेतदंगतिल
तर्पणं ॥ परेद्युःश्राद्धस्तदाकर्तव्यं ॥ तथाचहारितः ॥ ततःपरेह्निकुर्वीत
तर्पणंतुपुरःसुधीः ॥ तच्छेषैस्तिलदर्भस्तु प्रातःस्नात्वामृतैर्जलैः ॥ परेद्युःप्रा
तःस्नानानंतरंतर्पणकृतेतज्जलंअमृतमित्युक्तंभवतीतिज्ञापनार्थेअमृतै
र्जलैरित्युक्तं ॥ तथाचस एव ॥ तर्पणंहमृतंप्रातर्द्वितीयेप्रहरेप्ययं ॥ तृतीये ३॥
जलमित्याहुश्चतुर्थेरुधिरंभवेत् ॥ तस्माछ्राद्धेतुपूर्वेद्युःकृत्वास्नात्वापरेह्नि ॥ प्रातः

(5A)

तिल

पितॄंश्च संतर्प्य पश्चात्संध्याह्निकं चरेत्॥ अन्यत्रापि॥ तिलदर्भयुतं तोयं स्वधया
यत्र दीयते॥ न स्तोयमतं भक्त्या पितॄणामक्षयं भवेत्॥ प्रयोगपारिजातेपि॥ परेहन्युषसि
स्नात्वा श्राद्धांगं तर्पणं॥ पुनः स्नात्वैव कुर्वीत पश्चात्संध्यां समाहितः॥ उदितैर्वा स्नाति २
त्वा संध्यां कृत्वैव तर्पयेत्॥ यस्तु तर्पयेत्प्रातः कृत्वा श्राद्धं परेहनि॥ पितरस्तस्य ष्टिमा
प्राति न न कुप्यंति वै ध्रुवं॥ परेद्युः श्राद्धकर्मार्थैः यो न तर्पयते पितॄन्॥ अतस्माः
पितरस्तस्य शापं दत्वा व्रजंति ते॥ एवं प्रत्याब्दिकवत्तीर्थश्राद्धे गयाश्राद्धे चां
गतिलतर्पणं परेहन्येव कर्तव्यं॥ तथा च स्मृतिचंद्रिकायां तीर्थश्राद्धे गयाश्रा
द्धे श्राद्धे प्रत्याब्दिके तथा॥ परेहनि द्विजः कुर्यात्तर्पणं तिलसंयुतं॥ सकृन्म
हालयेपि परेहन्येव कर्तव्यं॥ तथा च दक्षः॥ श्राद्धांते प्रत्यहं कार्यं पक्षश्राद्धांग
तर्पणं॥ सकृन्महालये श्राद्धे परेहनि तिलोदकमिति दर्शपात संक्रांति मन्वं

तरादिश्राद्धेषु श्राद्धात्पूर्वमेवांगतिलतर्पणं कर्त्तव्यं तथाह मत्स्यः पितृयज्ञं तु नि
र्वर्त्य तर्पणाख्यं द्विजोत्तमः संपूर्णे दर्शे साग्नेः क्रममाह लौगाक्षिः ॥ पश्चात्तं क
र्म निर्वर्त्य वैश्वदेवं च साग्निकः ॥ पिंडयज्ञं ततः कुर्यात्ततोन्वाहार्यकं बुध इति पश्चा
त्कर्मान्वाधानकर्म अन्वाहार्यकं दर्शश्राद्धमिति संक्षेपः पिंडान्वाहार्यकं श्रा
द्धं कुर्यादिंदुक्षये सति ॥ पिंडान्वाहार्यकं श्राद्धं दर्शश्राद्धं स्मृत्यंतरेपि दर्शेपाते च
संक्रांतौ युगमन्वंतरादिषु ॥ तर्पयित्वा पितॄन्पश्चाच्छ्राद्धं कुर्यात्प्रयत्नतः ॥ पक्ष
श्राद्धहिरण्यश्राद्धाष्टकाश्राद्धानुमासिकश्राद्धेषु श्राद्धानंतरमेव तदंगतिलत
र्पणं कर्तव्यं ॥ तथा स्मृतिचंद्रिकायां पक्षश्राद्धे हिरण्ये च पश्चाद्दद्यात्तिलोदकं
तथान्वेवाष्टकाश्राद्धे श्राद्धे चैवानुमासिके ॥ पक्षश्राद्धादिषु अंगतिलतर्पणा
नंतरं नित्यतर्पणमपि कर्तव्यं तत्र पैठीनसिवचनात् पूर्वमेवोदाहृतं पितॄन्या

(5A)

दिस्त्रीकारूण्यप्रत्याब्दिकश्राद्धेचांगतिलतर्पणंपक्षश्राद्धवत्॥श्राद्धानंतरमे
वनपरेद्युः॥तथाचस्मृतिचंद्रिकायां॥श्राद्धांगतर्पणंकुर्यात्सतिलंतत्परेह
नि॥पित्रोर्विषयएवस्यान्नचान्यविषयेदिति॥ननु॥नेकश्राद्धद्वयंकुर्यात्से
मानेह्निनकुत्रचित्॥नयज्ञंनबलिंनैवदेवर्षिपितृतर्पणमिति॥देवलोक्तेनेवनि
त्यस्यप्रत्याब्दिकादिषुनिषिद्धत्वात्॥तत्कथंचेद्भतिपादनमितिचेत्सत्यं॥तस्य
निषिद्धस्यश्राद्धादर्वाग्विषयत्वात्॥अतएवपैठीनसिः॥श्राद्धंनिर्वर्त्यविधिवद्वै
श्वदेवादिकंततः॥ब्रह्मयज्ञंततः कुर्यात्तर्पणंतुतिलैर्विनेति॥नन्वेवं॥पितृक्षयाहे
संप्राप्तेसर्वेषांतर्पणंनहि॥मातृक्षयाहसंप्राप्तेतद्वर्गेतर्पणंनहि॥इतिवचनेनपितृ
मातृविभागेनतर्पणनिषेधः॥कथमितिचेन्नैवं॥इदंवचनंजीवत्पितृकस्यप्र
मीतमातृकस्यमातुःश्राद्धांगतिलतर्पणंपितृपितामहप्रपितामहानामेवकर्तव्यं नसर्वेषां
मात्रादिनामपिश्राद्धेयावंतउद्दिष्टाःप्राप्तःस्नानेनतर्पयेदितिवचनात्॥मा २८

पि २

सि॰

तर्प॰वि॰ त्रक्ष्ययांक्ष्संप्राप्तेसतिजीवत्पितृकेनमातृवर्गोद्देशेनमातृश्राद्धांगतिलतर्पणंनकर्तव्यं॥जी
वमानोपितायस्यमातायस्यविपद्यते॥मातुःश्राद्धंसुतैःकार्यंनकुर्यात्तिलतर्पणं॥वि
५ शेषनिषेधादिति॥ननु॥तथासतिनित्यतर्पणंनानुष्ठेयं॥मात्रादिश्राद्धेनप्रसंगाद्दर्श्रा
(6) क॰श्राद्धादेवश्राद्धांगतिलतर्पणेनप्रसंगान्नित्यतर्पणानासिद्धिरितिचेत्॥वैषम्या
त्तदर्शादौकेमन्वाद्यैःसंपातेदेवताभेदाभावादेकानुष्ठानेनतस्यापिप्रसिद्धिर्भविष्य
ति॥प्रकृतेतुदेवताभेदस्वस्थानेवांसध्याति॥पितृप्रत्याब्दिकेतावत्सितत्पितामहप्रपि
तामहानांत्रयाणामेवदेवतात्वमितितदंगतिलतर्पणेपितेषामेवदेवतात्वमितित
गदंगतिलतर्पणेपितेषामेवदेयंनपरेषांदेयं॥तथैवप्रत्यब्दांग[illegible]तिलांबुस्यान्निषि
द्धेस्यान्नेरहनि॥श्राद्धियावंतःपितरउद्दिष्टाःप्रातस्तानेनतर्पयेत्इतिस्मरणात्॥तथाचाप्र ५
त्याब्दिकेपिनित्यश्राद्धेनित्यतर्पणमपिकर्तव्यंदेवताभेदात्तथादर्शादावपि॥पि
तरोयत्रपूज्यंतेतत्रमातामहाअपि॥अविशेषेणकर्तव्यंविशेषान्नरकंव्रजेत्॥

Rajwade Sanshodhan Mandal Dhule and the Yashwantrao Chavan Pratishthan Mumbai joint project

स्प॰ त्या॰ ७।

पित्रोश्चैवानुमासिके॥ अपरेह्नि प्रकुर्वीत तर्पणं तु तिलैर्युतामति॥ अक्र
७ रयोप्रत्यवायमाह पराशरः॥ सापिंड्री करणादूर्ध्वं येोन तर्पयते पितृन्॥
(6A) पिबंति रुधिरं तस्य तत्र षोत्तो जलकांक्षिणः॥ मरीचिः॥ सापिंड्री मासि
कं चैव न ददाति जलांजलीन्॥ तावत्तिष्ठंति नरके पुनः प्रेतत्वं कृ
या॥ एवं संग्रोप्य कर्तव्यं अन्यथा पतितो भवेत्॥ इति श्रीस्मृति
सार समुच्चये तिल तर्पण विधिः समाप्तः॥ ७॥ ७॥ श्रीः
द्रार्जित भुरिकष्टेन पुस्तके लिखितं मया॥ हर्तुमिच्छं तु योपापि तस्य वंश
नाशि क्षयो भवेत्॥ इदं पुस्तकं। शंकर भट्टेन लिखितं॥ ७॥ श्रीरस्तु॥ शुभं भवतु॥ ॥ ॥ ७
इदं पुस्तकं बापनामक राम भट्टस्य तर्पण प्रकरण समाप्तिगमत्॥

(71)

७

॥ इतिस्मृतिसारसमुच्चयतर्पणविधिःसमाप्तः ॥

७

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com